'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 1st Semester Examination, 2021

## CC2-SANSKRIT

Time Allotted: 2 Hours　　　　Full Marks: 60

*The figures in the margin indicate full marks.*

विभाग-क

1. (क) 'रघुवंशम्' इति महाकाव्यमाश्रित्य राज्ञः दिलीपस्य चरित्रचित्रणं कुरुत। 12

अथवा

(ख) ''उपमा कालिदासस्य''– इति उक्तेः 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गमवलम्ब्य व्याख्या कार्या।

2. संस्कृतभाषया देवनागरीलिप्यां व्याख्या कार्या। 6

(क) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

अथवा

(ख) मन्दः कवियशः प्रार्थी गमिष्यामुपहास्यताम्।
प्रांशुलभ्येफले लोभादुद्बाहुरिव वामनः॥

3. अनुवादः करणीयः (द्वयोः) – 3×2 = 6

(क) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारभ्यः आरम्भसदृशोदयः॥

(ख) प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥

(ग) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥

4. संस्कृतभाषया देवनागरीलिप्यां संक्षिप्तोत्तरं प्रदेयम् (द्वयोः) – 3×2 = 6

(क) 'बृद्धत्वं जरसा विना'– किमर्थं कस्य विषये वा इदम् उक्तम् ?

(ख) 'जगतः पितरौ वन्दे'– 'पितरौ' शब्देन कौ बौद्धव्यौ ?

(ग) ''स ताभ्यो वलिमग्रहीत्''– अत्र 'वलिम्' इति पदस्य कोऽर्थः वर्तते ? पद्यांशे कस्य विवरणं विद्यते ? सम्पूर्णं पद्यं लिखत।

## विभाग-ख

5. संस्कृतभाषया देवनागरीलिप्या च एकं व्याख्यात। 12

(क) 'भारवेरर्थगौरवम्'– इत्युक्तेः याथार्थ्यं किरातार्जुनीयस्य प्रथमसर्गमवलम्ब्य प्रतिपादयत।

(ख) किरातार्जुनीयम् इति महाकाव्यस्य प्रथमसर्गमवलम्ब्य द्रौपद्याः राजनैतिककुशलतां वर्णयत।

6. (क) संस्कृतभाषया देवनागरीलिप्यां व्याख्या कार्या (एकस्य)। 6×1 = 6

(i) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकुलेषु हि कुर्वते रतिं
नृपेस्वमात्येषु च सर्वसम्पदः॥

(ii) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शढास्तथाविधानम्
असंवृताङ्गान्निशिता इवेषवः॥

(ख) श्लोकपादपुरणं कुरुत (एकस्य)। 6×1 = 6

................................................
................................................।
तनोति शुभ्रं गुणसम्पदा यशः
................................................॥

अथवा

................................................
................................................।
गुणानुरोधेन विना न सत्क्रिया
................................................॥

7. संक्षिप्तोत्तरं प्रदेयम् (द्वयोः)– 3×2 = 6

(क) वृकोदरः कः ? किमर्थं तं एवम् उच्यते ?

(ख) 'किरातार्जुनीयम्' इति महाकाव्ये कति सर्गाः सन्ति ? अस्य महाकाव्यस्य उत्सः कः ?

(ग) 'स वर्णिलिङ्गी विदितः समाययौ'– कं वर्णिलिङ्गी उच्यते ? 'वर्णिलिङ्गी' शब्दस्य कोऽर्थः ? सः कुत्र किमर्थम् उपगतवान् ?

——×——